Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२४०

Title शास्त्रदीपिका अष्टमाध्यायः

Author पार्थसारथिमिश्रः

Extent ६ पत्र Age सं. १८६४

Subject मीमांसा

© Dharmartha Trust J&K. Digitized by eGangotri

प्राणदीपिकाष्टमाध्यायः

५२५०

© Dharmartha Trust J&K. Digitized by eGangotri

अष्टम

तस्यमर्थः।यथाग्नेयेन स्वर्गः कृतः तथा सौर्येण ब्रह्मवर्चसमिति। एवमनेकदेवतेष्वग्नीषोमीयैन्द्राग्नविध्यंतः आज्यद्रव्यकेषूपांशुयाजस्य। यथा
दध्यामिक्षादिषु द्रव्येषु पशौ च सान्नाय्यस्य। पश्वंतरेषु ऐकादशिनेषु सवनीयस्य पशुगणांतरेषु एकादशिनस्य। साद्यस्केषु सोमस्याह
र्गणेषु सत्रेषु अहीनेषु च द्वादशाहस्य। संवत्सरादिषु गवामयनस्येत्यादि द्रष्टव्यं। एवमिष्टिविशेषातिदेशः। उत्तरस्त्वसेवमपंच २ प्रकृतता दि
ष्टेः सोमे प्रकृत्तिः स्यात् अग्निहोत्रदर्शपूर्णमासयोज्योतिष्टोमे चरोहनावधानाभिषवादीनि द्रष्टार्थान्यंगानि निराकांक्षीकरणसमर्थानि
।तैश्च निराकांक्षतादतिदेशो नास्ति। तथापि सोमे दार्शपौर्णमासिकधर्मातिदेशं केनचिद्धेतुना शंकेनचिद्धेतुना शंकमानं निराकर्तुमिदमधिक
रणं। कः पुनरसौ हेतुः दीक्षणीयादिष्ववभृथपर्यंतास्विष्टिषु पशुषु च दर्शपूर्णमासविध्यंतोतिदेशेन प्राप्यमाणो मनसि विपरिवर्तते।
तन्मध्यवर्तित्वात्तु सोमस्य तथापि तदन्वयं शंकते तस्यैकदेशत्वं प्रयाजानुयाजा इति च दर्शनमवकल्पते तस्मादिष्टिः सोमे प्रवर्तेतेति। सो
ऽयं निराक्रियते नामधेयस्य प्रवृत्तिर्युक्ता। प्रयाजादिकः तु दीक्षणीयाद्यंगवर्ति वाजपेय प्रपन्यायेनैकदेशत्वसंख्यं मासमनूद्यत इति ना
स्ति सोमेतिदेशः ३ ।। इष्टिरिष्टिषु दर्शपूर्णमासयोः प्रकृतिः स्यात् सौर्यं चरुं निर्वपेदित्यादिष्विष्टिषु निर्वपतादिसामान्येन दर्श

© Dharmartha Trust J&K. Digitized by eGangotri

२

पूर्णमासमिति विध्यंतोपस्थानात्तस्यातिदेशः॥ इदं च पशुस्य लिंगमित्यस्य प्रपंच इति नानीव पूर्वपक्षे यतितव्यं उत्तरत्रापि सर्वत्र ४ पशौ च लिंगद
र्शनात् पशौ च प्यग्नीषोमीये तद्धितेन देवतानिर्देशः आलभतिश्च दर्शपूर्णमाससादृश्यमिष्टाव प्यालभतिर्विधते दर्शालभते॥ दृश्यते च
पशोरवाहनादिदृष्टार्थांगासिद्ध्येतिदेशापेक्षा तस्मात्तत्रैष्टिको विध्यंतः ५ दैक्षस्य चेतरेषु॥ इतरेषु सवनीयविरूढादिषु पशुषु प्राणि
द्रव्यकत्वसादृश्यविशेषाद्विशसनादिद्रव्यसंस्कारलाभाच्च दैक्षस्याग्नीषोमीयस्य विध्यंतः ६ एकादशिनेषु सौत्यस्य दैदसन्यस्य दर्श
नात् एकादशिनेषु पशुषु सुत्याकालत्वसामान्यातिरेकाद्दूरत्वान्यदर्शनाच्च हेद्द्रशने यूपमच्छतरतिसवनीयस्य विध्यंतः ७ तस्य
वृत्तिर्गणेषु स्यात्पशुयूपदर्शनात् सौत्रामण्यादिषु पशुगणेषु गणत्वसामान्याधिक्याद्वैकादशिनविध्यंतः ८ अव्यक्तासु तु
सोमस्या विश्वजिता यजेतेत्यादिषेकाहेषु द्वादशाहे च किं दार्शपौर्णमासिको विध्यंतः उत सौमिक इति संशये विशेषाभावाद् नि
यमेन प्राप्त उच्यते। सौमिकः स्याद्व्यक्तत्वसामान्यात्। के यमयक्ता। यागार्थतया विनियुक्तदेवताविरहः। यत्र तद्धितचतुर्थीमंत्रवर्णै
र्यागार्थतया वै देवता विनियुक्ताः। तद्युक्तं इत्यरत्वव्यक्तं तथा च विश्वजिता दमः सोमम्म॥ न त्वें द्रवायवं गृह्णाति। तितद्धितेनैव देवतापि राम २

© Dharmartha Trust J&K. Digitized by eGangotri

सोमे विहिता। न यागे देवसने न विधीयते किंतु गृह्ये तद्गतायास्तु पश्चादार्थिको यागसंबंधो न तु प्रथममेव यागान्वयस्तस्य यत्नतः। अतः
सोमविध्यंतो विश्वजिदादिषु ९ गणेषु द्वादशाहस्य द्विरात्रादिष्वहर्गणेषु व्यक्तत्वं गणत्वं चाधिकं विद्यते तस्माद्द्वादशाहविध्यंतः ९
वंचपत्नीसंयाजांतान्यहानि संति षट्त्रिंशत्सादृशो गणधर्मा लभ्यंते १० गवामयनस्य च तद्द्वादशादिषु संवत्सरसत्रेष्वादित्यानामयनप्रभृतिषु संवत्स
रसत्रत्वसामान्यात्संवत्सरनियमत्विसमयाच्च गवामयनविध्यतः ११ निकायिनां तु पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् साहस्राः साद्यस्क्रास्त्यैकसंत
यासु गवामयनस्तस्य पश्चात्क्रमेण विहिता यागा निकायिन इत्युच्यंते। तेषां प्रथमो धर्मवान् उत्तरेषु किं ततो धर्माः प्रवर्तन्ते उत सौमिकादिति सं
शये व्यक्तत्वात्सौमिकात्सौमिकादिति प्राप्ते एकनिकायवर्तित्वमेकनामत्वं चावांतरसामान्यमधिकमस्तीति पूर्वविध्येत उत्तरेषु। नभा
यावहस्य साहस्रस्येत्यादिधर्मदर्शनं पूर्वधर्मप्राप्तिं दर्शयति १२ कर्मणस्तु प्रवृत्तित्वात् फलनियमकर्तृसमुदायस्यानन्वयस्तं द्वंधन
त्वात् फलं स्वर्गः नियमो यावज्जीविकत्वं। कर्ता स्वर्गकाम। समुदाय आग्नेयादीनां षण्णां मिथः साहित्यं। किमेते विकृतिषु सौर्यादि
षु मिथः। प्रदिश्यंते नेति संशयः तत्र प्रकृतिसंबंधाद्विकृता वतिदेशनं। प्रयाजादिवदेतेषामिति प्राप्ते अभिधीयते। प्रकृत्यैव निबद्धत्वाद्विह

© Dharmartha Trust J&K. Digitized by eGangotri

सासहनान्वयः। नचातिदेशतः प्राप्तिरित्यभावानपाद्दते। कथं भावापेक्षा हि विकृतिभावनायदेव प्रकृताविष्टं भावेन गृहीतं तदेवापेक्षते न
३ च फलादीनामित्यभावान्वयः। फलनियमयोः पुरुषार्थत्वात् स्वर्गकामोपि न कर्मार्थिः कर्मैव तदर्थमिष्यते स्वर्गकामाधिकरणे तथाग्ने
याद्यानि षडपि तुल्यवत्फलं प्रति करणत्वेनोपदिष्टानि नान्योन्यस्यांगं। तेन वैकस्योपकारेऽन्यानि प्रवर्त्तंते न चाप्रवर्त्तमानेषु तत्सा
द्धिस्संभवति। तस्मान्न फलादीनामतिदेशः माभूदित्थं भावांशेनातिदेशः फलापेक्षयैव विश्वजिदादिष्वश्रुतफलेषु फलमतिदि
श्यतामिति चेत् नैवं न हि फलं विकृतावतिदेशेन विधीयमानमंगमेव स्यात् न फलं ननु फलं विकृतिं प्रति विधीयते फलमेव प्रा
कृतं यथावास्थितमुद्दिश्य विकृतिर्विधीयतामिति चेत् न तस्य विकृतिः साधनं भवितुमर्हति। प्राकृत्यैव स्ववाक्यगतयाऽवरुद्ध
त्वात् तस्मान्न विकृतेः प्रकृतिफलसंबंधः ११ गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् इह गुणफलानि गोदोहनेन पशुकामस्य प्र
णयेदित्येवमादीनि तत्साधनभूताश्च गोदोहनादयः किं विकृतिषु प्रवर्त्तंते नेति संशयः तत्र प्रधानफलं प्रधानेन बंधनत्वात्तस्य च वि
कृतिष्वप्रवृत्तेर्भानाम प्रवर्त्तिष्टा गुणफलं तु गुणप्रवृत्त्या प्रवर्त्तितुमर्हति। तथा हि। प्रणयनं तावद्दृत्ति दृश्यते। तत्साधनभूतं च एम ३

गोदोहनमनंगमपि साधनत्वाद्धर्मसंबन्धप्रवर्त्तते तत्प्रकृत्या च तत्साध्यं फलमपि प्रवर्त्तेत। यथा प्रधानाग्नेर्दध्यादिसाध्यमिंद्रियादिरस्या
देहोमसाधनत्वेन विकृतिषु प्रवृत्तेः प्रवर्त्तते उच्यते नहि गोदोहनादीनामित्थंभावनसंग्रहः इत्थंभावातिदेशेन तद्धर्माणां नातिदेशधीः।
नहि फलं विधया कथं चिदपि प्रवृत्तेः साधनं न तत्त्वमिति दिश्यते। कथं भावापेक्षा हि विकृतिचोदनाधारस्योपस्थापितां प्रकृतिचोदनाम्
ऽत्यन्तस्याकांक्षायाः साध्यसाधनांशावनाकांक्षितत्वादनारभन्ती यमित्थंभावांशं वाक्यशेषत्वेन गृह्णाति। तत्र यत् प्राकृतां चोदना
यामित्थंभावरूपेण। गृहीतं प्रमाणान्तरेण कथं चित् साधनभावमुक्ती ये तं गोदोहनादि तस्य कः प्रसंगो विकृतौ माभूदतिदेशः प्रणयन
स्यताश्रयस्य तस्याविकृतावपि भावान्न दाश्रितं गोदोहनमपि पुरुषः कामनावशात्प्रयुंक्तामिति चेत् न वैगुण्यात् अतिदिष्टस्यांगस्य
तस्य च धर्मस्य विनाशास्त्रेण न पुरुषेच्छामात्रेण युक्तो बाधः तद्बाधे हि वैगुण्यं स्यात्। अवैगुण्ये तु भवतु कामस्यापि प्रवृत्तिः तथा
हि भाष्यकारः तस्मिंश्च प्रवर्त्तमाने कामोऽपि प्रवर्त्ततेति इति। किंच यद्दर्शपूर्णमासापूर्वसाधनभूतं प्रणयनं तदेवाश्रयः। तादृश
स्यैव प्रकृतत्वात्। न च विकृतौ तादृगस्ति। तस्मादाश्रयाभावादपि न गोदोहनतत्फलयोः प्रवृत्तिः १४ एककर्मणि विकल्पो विभा

© Dharmartha Trust J&K. Digitized by eGangotri

४ गोदृहिशोरनैकत्वात् सौर्य आग्नेयविकार इति वक्ष्यते। आग्नेयश्च पौर्णमास्यमावास्ययोरुत्पन्न उभयसंज्ञः तेन चतुर्होत्रा पंचहोत्रा त
स्यात् कालद्वयेभिमर्शनं। तत्र सौर्ये मंत्रद्वयं किं पौर्णमास्यमावास्याकालयोर्व्यवस्थाप्रयोजकमस्तुताव्यवस्थयेति यत्र व्यवस्था प्रकृतौ
दृष्टा साप्यते विकृतावपि प्रकृतावार्थिकी तेषां विकृतौ नातिदिश्यते। चतुर्होत्रा पौर्णमासीं पंचहोत्रामावास्यायामिति समुदाय
द्वारेण मंत्रयोरुपदेशः प्रकृतत्वान्न कालद्वारेण तस्याप्रकृतत्वात् अतः समुदायद्वयवर्त्तिन आग्नेयस्यैव मंत्रद्वयं एकार्थत्वा
द्विकल्पेन तत्र पौर्णमासीकाले पौर्णमासिकैर्हविरंतरैः सहाभिमृश्यमानमाग्नेयमविरोधाच्चतुर्होत्राभिमृष्टं। एवममावास्या
काले पंचहोत्रा। ननु कालकृताव्यवस्था तत्र शास्त्रार्थः। तस्माद्विकृतावव्यवस्था १५ लिंगसाधारण्याद्विकल्पः स्यात् इतिष्टि
षु दर्शपूर्णमासयोः प्रवृत्तिरित्युक्तं। तत्र षण्णामाग्नेयादीनां कस्य प्रकृतिः विशेषाभावादनियमः। सादृश्यविशेषात्त्वेकदेवत्यस्य सौ
र्यादिविकदेवत्यस्याग्नेयस्य प्रकृतिः। अनेकदेवतेष्वग्नीषोमीयैंद्राग्नयोः आज्यादिद्रव्यकेषूपांशुयाजादेः कथं पुनरेकदेवत्यत
माग्नेयसौर्ययोः। वाक्यशेषादिति दर्शितं भाष्ये १६ विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ऐंद्रेषु पुरोडा राम ४

© Dharmartha Trust J&K. Digitized by eGangotri

शेषु किं देवतासामान्यात्सान्नाय्यविधानं उत हविःसामान्यादौषधविधानं इति संशये। तथाग्नेयं यथा सिद्धे देवतासामान्यादौषधस्य ह
विःसामान्याद्वा सान्नाय्यस्येति देवतासामान्यहविःसामान्ययोः किं बलीय इति चिंत्यते। विशेषाभावादनियमं मुख्यत्वप्राधान्याभ्यां
वा देवतायाः प्राबल्यं मन्वानस्योत्तरं हविषस्त्यज्यमानत्वात्तस्यासन्निहितं कर्मणि। उद्देशमात्ररूपत्वाद्देवता एवं देशस्थिता। यद्य
प्यस्यासन्नत्वं ते नैवोपस्थितं विधानं मासाद्यनिराकांक्षं कर्म न बहिरंगस्य तद्देवतोपस्थापितमपेक्षते। यद्यपि प्राप्ति परिकार्यत्वाद्दे
वतामुख्या तथापि तत्स्वरूपं वेलायामाकांक्षाभावादनतिदेशः। कर्मविधानरकाले तु प्रत्यासन्ने हविःसामान्यं बलीयः। प्राधा
न्यं तु देवताया नवमे निराकरिष्यते किं चौषधे सान्नाय्यधर्मास्तत्रौषधधर्माः सर्वे बाध्येरन् न संभवात्। यथायथं तु प्राप्तौ न क
स्यचिद्बाधः। तस्माद्धविःसामान्यं बलीयः १७ हिरण्यमाज्यधर्मतेजस्त्वात् कृष्णलचरणावाज्यौषधयोः कस्य विधानं स्यात् उज्ज्व
लत्वसामान्यादाज्यस्याविशदत्वादौषधस्य वा विचारे शक्यो योगात्तु तद्धर्मः १८ मधूदके द्रव्यसामान्यात्पयोविकारः स्यात् दधिमधु
घृतं धानाः तंडुला उदकमिति सत्रमधूदके पयः प्रवर्तने उताज्यमिति संदेहे स्वाभाविकद्रवत्वसामान्यात्पयः। नैवं गव्यस सर्पिषाभा

© Dharmartha Trust J&K. Digitized by eGangotri

विकृद्ववत्वेऽग्निसंयोगाद्राज्ये पि द्रवत्वसद्भावाद्वर्णसामान्याधिक्यात्पयोधर्माणां च दोहनादीनामसंभवादुत्पवनादीनां संभवाद्राज्य

५ धर्ममधूर्तकं १९ इति शास्त्रदीपिकायां अष्टमाध्यायस्य प्रथमः पादः वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहे श्रुतानु० —त वा

5 जिनयागे सौत्रामण्यं गमत्तेषु चाश्विनादिग्रहे श्रुतिं सौमिकाविध्यंतउत नैष्टिक इति निष्टिकइति संशये। सोमो वै वाजिनं। सुरासो

मो वै वाजिनं। सुरा सोमरसः सम रसः सोमे सोमशब्दस्तद्धर्मातिदेशार्थोग्निहोत्रशब्दवत् तस्मात्सौमिकः प्रशंसार्थस्त्वयं सोमश

ब्दोन विधानार्थः विध्यश्रवणात् तद्धविः सामान्यादैष्टिको वाजिने यथा विध्यंतस्सुराग्रहे चैवमथः १ पशुः पुरोडाशविकारः

स्याद्देवतासामान्यात् यथा वग्नीषोमीये दर्शपूर्णमासयोः प्रकृतिरित्युक्तं। तत्र देवतासामान्यमपि पुरोडाशेनैव विधते। द्रव्यो

रपि घनत्वात् सान्नाय्यं वा प्रवर्तेन हविः सामान्यात् सान्नाय्यं हि पशुतः प्रभवति। पशुरपि पशुप्रभवः। संबंधित्वाच्च पशुसा

न्नाय्ययोः पशुः प्रतीतः सान्नाय्यमुपस्थापयति। सान्नाय्यपात्रे चोखा पशौ दृश्यमानात तत्प्रकृतित्वं सूचयति २ एकधासा

मर्तिसामान्यात् तत्रापि दध्नो विकारस्याद्धनत्वसामान्यात्। पयसो वा तादृशा स्यात्पशुप्रभवं दधि तु न तद्वत् तं पशुरपि सा एम ५

ष्णात्पशुप्रभवः। गतिमत्त्वं च पशु पयसोऽस्त्यत्वं। न दधिकं दधितः पयसः ३ आमिक्षोभयभाग्यत्वादुभयविकारः स्यात्। आमिक्षाया
गः सान्नाय्यविकार इत्यसंदिग्धं। दध्नः पयसो वेति विंशयते। दधिक्षारं च संसृष्टमामिक्षेत्यभिधीयते। उभयोश्च रसस्तस्यां दृश्यते तो
दृशामिक्षा। विशेषापह्नुतानस्मादुभयोर्विकृतिर्भवेत्। तत्र पयसि वाक्येतु समस्यागुणतः पयः। दधि द्वितीयानिर्देशात्प्रधानेनेतेन
सापदं। दध्येव प्रतिनिर्दिश्यते न च प्रतिदेवता। दध्येवातो हविस्तस्यात्तायंदो हविकारतः। पयसस्तु प्रधानत्वं तत्र कर्मसमाप्ति
तः। दध्नाहिनीयमानेन तदेव व्याप्यते पयः। कर्मतोपि प्रधानत्वं तस्य स्यात्संप्रदानवत्। सर्वनाम्ना परामृष्टस्येवातो वकल्प्य
ते। तदेव दधिसंयोगाद्भुनीभूतमतो हविः। तस्यैव देवतायोग आमिक्षापि तदेवतः। प्रातर्दोहविकारत्वमामिक्षायास्ततः स्थितं ४
सत्रमहीनश्च द्वादशाहस्तस्योभययां प्रवृत्तिरैककर्म्यात् गणेषु द्वादशाहस्येत्युक्तं। द्विविधाश्च गणाः सत्त्राण्यहीनाश्च। द्वादशाहो
प्युभयात्मा। तस्योभयविधस्याप्यनियतात्मनाः सर्वत्र प्रवृत्तिविशेषाभावात्। सत्रस्यैव तु सत्रेषु प्रवृत्तिः सत्रसाम्यतः। तथाऽहीनेष्व
हीनस्य तु सदृक्त्वादिति स्थितं ५ अन्यतरतोतिरात्रश्चात्वं च दशरात्रस्याहीनत्वं कुंडपायिनामयनस्य च तद्वतेष्वहीनत्वदर्शनात् यं

© Dharmartha Trust J&K. Digitized by eGangotri

६ द्वादशरात्रस्य कुंडपायिनामयनस्य च किं सत्रविकारत्वमुताहीनविकारत्वमिति चिंत्यते। तदर्थं च किमनयोरहीनत्वमुत सत्रत्वमिति वि
चार्यते। तत्रोपयंति एतत्रत्वा द्विरात्रादिवदेतयोः। अहीनत्वं भवेन्नैव मासत्वेनोपापि चोदनात्। सत्रसंज्ञातकांडे च समाम्नातमिदं
द्वयं तस्मात्सत्रमतः सत्रविध्यंते। अप्रवर्तते ६ ॥ इति शास्त्रदीपिकायामष्टमस्याध्यायस्य द्वितीयः पादः॥ हरिर्गणे यरमुत्त
रस्योद्देशसामान्यात् आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सारस्वतं चरुं बार्हस्पत्यं चरुमिति तत्र संदेहः। किं प्रथम
स्याग्नेयविध्यंतस्तृतीयस्याग्नीषोमीयविध्यंत उत विपरीतमिति। स्थानसामान्यात्प्रथमतृतीययोः प्रथमतृतीयविध्यंतप्राप्तासा
बुच्यते। प्रथमस्य द्विदेवत्यत्वादग्नीषोमीयविध्यंतः। तृतीयस्य चैकदेवत्वादाग्नेयविध्यंतः देवतासामान्यमुत्पत्तिवेलाया
मेव शीघ्रं गम्यते स्थानसामान्यं तन्मापेक्षत्वाद्विलंबितत्वाद्दुर्बलं। तस्माद्देवतासामान्यात्प्रथमतृतीययोस्तृतीयप्रथमविध्यं
तः १ गणचोदनायां यस्य लिंगं तदावृत्तिः प्रतीयेताग्नेयवत् अनेकसमपरात्रे श्रूयते। चत्वारि त्रिवृत्सहस्राण्यग्निष्टोमस्तुत्यानीति। त
त्र किमेषु षोडशिकसाद्यस्काः त्रिवृतो विध्यंतस्तु र्याप्यावर्तनीयः उत त्रिवृद्राशीनां चतुर्णामपि क्रमेण चतुर्षु प्रवृत्तिरिति संशये। राम ६

पूर्ववत्संघातसामान्यस्यदुर्बलत्वाच्चित्रत्वसामान्येनाद्यस्यैवप्रवृत्तिः । नैवं । मिहसहश्चोदितानांसंघातोपिशाद्धित्रित्वमपितत्रसं
घातसामान्यंप्रधानगतंभूतस्तोत्रीयागताच्चित्रत्वाद्दुल्लायइतितद्ग्रेनचतुर्णामपिपदार्थाधानांचतुर्थप्रवृत्तिः । एवंचाग्निष्टो
ममुख्यानीसेषवादोपयुज्यते । अन्यथासर्वेषामग्निष्टोमत्वंस्यात् आद्यस्याग्निष्टोमत्वात्तत्राग्निष्टोममुख्यानीतिनघटते २
कालाभ्यासेपिवाहरिःकर्मभेदात् षड्विंशद्ग्रन्थेश्रूयते । षडहाभवंतिचत्वारोभवंतीति । तत्रविचार्यतेकिमेषुचतुर्विंशसमहः
सुहाद्दशाहिकस्यद्दशत्रविधर्मस्तस्यप्रवृत्तिःउतषडहस्यैवचतुरावृत्तिरिति । तत्र । चतुर्विंशतिरेतानिचत्वारषडहारनि । चोद्यंतेहा
नितेनैषद्दादशाहःप्रवर्ततेनाउच्यते । चतुर्विंशतिसंख्यात्रगुणःसाक्षान्नचोद्यते । चतुःसंख्यैस्तुषडहैरनुमानेनगम्यते । च
तुःसंख्यास्तुषडहाःप्रत्यक्षेणेवचोदिताः तस्मात्षडहविधर्मतःशीघ्रमत्रावगम्यते ३ सद्यःग्राणेषुनदभ्यासःप्रतीयेतहृतल
क्षणग्रहणात् शतोक्थ्याभवति एतास्त्रिरात्रंभवत्तीतिश्रुतं । तत्रसंशयः किंज्योतिष्टोमस्यशतकृत्वोभ्यासउतद्वादशाहप्रवृ
त्तिरिति । तत्रोक्थ्यादिशद्यानांज्योतिष्टोमनामत्वंमत्वात्तस्मैवद्दरस्थमप्यन्नदृघंशताभ्यासउपादेयोगुणोविधीयतइतिमता

© Dharmartha Trust J&K. Digitized by eGangotri

नस्तस्यैवाभ्यासमाह। संस्थानि भिन्नास्तेन तत्क्रतोः कस्यापि वाचकं। संनिध्यभावतः संस्थाविशिष्टगणवाचिनः। तस्माद्द्वादशाहविध्य
१ तः ४ गणादुपचयस्तत्प्रकृतित्वात् शतोक्थ्याभवन्तीत्यत्र द्वादशाहिकोह्यस्य रात्रो दशकृत्वः प्रवर्तत इत्युक्तं। तस्मिंश्च दशरात्र
भितौ द्वावग्निष्टोमौ। तत्र शतोक्थ्य इति रणकं द्वौ द्वावग्निष्टोमौ उक्थ्यसंस्थयावर्धितयो। तत्राम्यमाने उक्थ्यस्तोत्रेषु संशयः किं
द्वादशाहिको— स्तोत्रविकारास्तेषु हि केचिद्विशेषाः प्राकृतेभ्यः स्तोत्रेभ्यो विध्यंते उत ज्योतिष्टोमो— विकारा इति। तत्र द्वादशाह
विकारत्वादस्य गणस्यान्तरीयेषूक्थ्याहःसु याम्युक्थ्यस्तोत्राणि तद्विकारत्वमेवास्मिन्नागंतेनाप्युक्थ्यस्तोत्राणां युक्तं। नैतद्युक्तं
॥ज्योतिष्टोमेत्युक्थ्यास्तोत्राणामुत्पत्तिः। द्वादशाहे तन्निर्देशमात्रानां तेषामेव विशेषा विहिताः। यत्र चोत्पत्तिस्तत एवागम
नं युक्तं न यत्रातिदिष्टाः। नहि भिक्षुको भिक्षुकाद्याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके। तस्माज्ज्योतिष्टोमिकानामेवोक्थ्यारी
नां प्रवृत्तिः ५ गायत्रीणामवच्छेदः प्रकृत्याधिकारात्संख्यातादग्निष्टोमव्यतिरेकान्तदाख्यत्व बृहस्पतिसवे प्रकृतितो एम
गायत्रं त्रैष्टुभादिषु नानाछंदःसु प्राप्तेषु छंदांसि तराणि। युद्धस्य गायत्री नियतागायत्रमेतदहर्भवतीति। तत्र संशयः किं त्रिष्टु १

भादिष्वेव चोरक्षमास्तेषु अक्षरलोपं कृत्वा गायत्री संपादयितव्या उत्तराः शतयीभ्य उत्पत्तिगायत्र्य आनेतव्या इति तत्र संख्यामात्रवा
चकत्वाद्गायत्रीशब्दस्य मा कृती ष्वेव चोरक्षमा मास्वक्षरावलोपो न विरुध्यते। तस्मात्ता से वाक्षरलोपः तथा तिस्रोनुष्टुभश्च तस्रो गा
यत्र्यस्त्वाधृपयप्यते। तत्रोच्यते संख्यामात्राभिधायित्वे सर्वत्रैवं प्रसज्यते। मंत्रांतरेष्वदारे चतस्मात्संख्यानिनाम त्वं। अष्टाक्षरैस्त्रि
भिः पादैर्युक्तामभिदधात्यसौ। तिस्रोनुष्टुभः स्वतगोणः शब्देनमुच्यतः। तस्मादुत्पत्तिगायत्र्य आनेयाः। पूर्वाधिकरणेऽपचय
श्चिंतितः। तत्य संभारपचयो पंचिंचिंतितः ६ ॥ इति शास्त्रदीपिकायामष्टमाध्यायस्य तृतीयः पादः हविर्होमो यज्ञाभि
धानं होमसंयोगात् अपंचिते तिरेशे यवार्दविचक्षयाद्दर्विहोमात्तरयमागताः। तेस्त्रसंगेन च यरेकयाजुहुयाद्दर्विहोमकु
र्यादित्यर्थवादगतो दर्विहोमशब्दोत्तरयमागतः। किं गुणविधिर्नामधेयं वा। नामापि किं लौकिकानामेवोत वैदिकानाम
पि। वैदिकानामपि किं यज्ञुस्त्वातीनामपि किं वा जुहोत्युत्पत्तीनामेवेति प्रसंगान्चिंत्यते। तत्र होमशब्दसंयोगात्तस्य च कर्मवचन
त्वात्तत्प्रधानत्वाच्च समासस्य कर्मनामत्वं। तत्र लौकिकानां स्थालीपाकादीनां कर्तरि दार्विहोमिकशब्दप्रयोगात्तेषामेवस्यात् वै

© Dharmartha Trust J&K. Digitized by eGangotri

रिके पि वास्तु होमे भयोगाद्धोमत्वाविशेषाच्च वैदिकानामपि। तत्र यन्नुसनी नाम पिचतुरवत्तं जुहोमत्वापत्तेस्तेषामपि। न यागस्य होम
८ त्वापत्तिः यागानुक्रमेतिरं प्रोक्षणादिवत्संस्काररूपं विधीयते। अतो जुहोसुसत्ती नामेवाग्निहोत्रादीनां नाम स्यात् यत्तु गुणविधि
त्वमाशंकितं तद्बोधमात्रं। तत्र तु समाख्यान्यायसिद्धमेवोत्तरमुपसंहृतं ४ तस्मिन्सोमः प्रवर्तेताव्यक्तत्वात् प्रासंगिकं परिसमा
प्याग्निहोत्रादिहोमाः पूर्ववंतउत पूर्वा इति विचार्यते।। तत्रा – नेतिकर्तव्यताकत्वादव्यक्तत्वाच्च सोमिको विध्यतः प्रवर्तेत। यागहो
मत्वेनासंतविसदृशत्वाद्धोमानामग्निहोत्रनारिशादीनां धर्मवतां सद्भावान्नतरमिति क्रमेण सोमयागाश्रयणं युक्तं अस्तु
तत्प्रकृतिकत्वमेव नैवं। नारिशांगभूतानामिध्माद्रीनां अंबकहोमे घभावदर्शनात् लिंगांतराणि च दर्शितानि दर्विहोमाना
मपूर्वत्वे लगमपत्तिः तस्मादपूर्वाः ५ संक्षेपविस्तारकः सापवादः सहृत्कानुमानात्तथा नामधेयात्। अधीताच्च वाक्या
त्यासिद्धा तिदशः करिष्यामहेतः परं तु हृच्चिंता ।। इति श्री पार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायामष्टमस्याध्यायस्य एम ८

९ चतुर्थः पादः ॥ ॥समाप्तश्चाध्यायः ॥ ॥संवत् १८ ७५ ॥ ॥ॐ॥ ॥

9

राम
९

© Dharmartha Trust J&K. Digitized by eGangotri

८

४२४०
८५७
सं. १२६८

शास्त्रदीपिकायांअष्टमोध्याय: प्रथमपत्रखंडित ९ पत्रे

© Dharmartha Trust J&K. Digitized by eGangotri